लावणं मधुराः स्निग्धाः शीताश्चैव रसा हिताः।
मुखपाके शिराकर्म्म शिरःकायविरेचनम्।
मूत्रतैलघृतक्षीरैश्च कवलग्रहः॥
मज्जोदार्व्विफलापाठा मृद्वीकाजातिपल्लवाः।
कषायतिक्तकाः शीताः काथाश्च मुखधावनाः।
तुलां खदिरसारस्य द्विगुणामरिमेदसः।
प्रक्षाल्य जर्ज्जरीकृत्य चतुर्द्रोणेऽम्भसः पचेत्।
द्रोणशेषं कषायन्तं पूत्वा भूयः पचेच्छनैः॥
ततस्तस्मिन् घनीभूते चूर्णीकृत्यार्द्धभागिकम्।
चन्दनं पद्मकोशीरं मञ्जिष्ठां धातकीं घनम्॥
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापद्मकेशरम्।
लाक्षां रसाञ्जनं मांसीं त्रिफलां लोध्रबालकम्॥
रजन्यौ फलिनीमेलां समङ्गां कट्फलं वचाम्।
यवासमगुरुपत्तङ्गगैरिकाञ्जनमावपेत्॥
लवङ्गनखकक्कोलजातिकोशान् पलोन्मितान्।
कर्पूरकुडवश्चापि पुनः शीतेऽवतारिते॥
ततस्तु गुलिकाः कार्य्याः शुष्का वास्येन धारयेत्।
तैलस्यानेन कल्केन कषायेण च साधयेत्॥
दन्तानां चलनं भ्रंशशौषिर्य्यक्रिमिरोगनुत्।
मुखपाकास्यदौर्गन्ध्यजाड्यारोचकनाशनम्॥
स्रावोपजेपपैच्छिल्यवैरस्यगलरोगनुत्।
दन्तास्यगलरोगेषु सर्व्वेषां तत्परायणम्॥”
इति खदिरादिगुटिकातैलञ्च॥ इति मुखरोगचिकित्सा॥ इति चरके चिकित्सास्थाने २६ अध्यायः॥)

मुखलाङ्गलः, पुं, (मुखं लाङ्गलमिव भूविदारकमस्य।) शूकरः। इति जटाधरः॥

मुखबन्धनं, क्ली, (मुखं प्रारम्भविषयः तस्य बन्धनं संग्रहोऽत्र।) ग्रन्थारम्भे तत्र वक्तव्यकथनम्। तस्य नामान्तरम्। अनुक्रमणिका। भूमिका। इति छन्दोमञ्जर्य्यां मुखबन्धनाख्यप्रथमस्तवकः। इति तद्ग्रन्थकर्त्तृगङ्गादासवैद्येन लिखितम्॥

मुखवल्लभः, पुं, (मुखस्य वल्लभः प्रीतिकरः।) दाडिमवृक्षः। इति शब्दमाला॥ मुखप्रिये, त्रि॥

मुखवाचिका, स्त्री, (मुखं वाचयति शोधयतीति। वच्+णिच्+ण्वुल्+स्त्रियां टाप्। अत इत्वं च।) अम्बष्ठा। इति राजनिर्घण्टः॥

मुखवाद्यं, क्ली, (मुखेन वाद्यम्।) वक्त्रनालवाद्यम्। धाक इति भाषा। इति त्रिकाण्डशेषः॥ मुखस्य मुखेन च वाद्यञ्च। शिवपूजान्ते बम् इति शब्देन गालवाद्यम्। यथा,—
“लिङ्गं निर्म्माय विधिवत् विधिवत् पूजयेच्च तम्।
षडक्षरं जपित्वा वै मुखवाद्यं शुचिस्मिते!॥”
इति लिङ्गार्च्चनतन्त्रे १५ पटलः॥
अपि च।
“मुखवाद्यं महत्वं हि श्रुत्वा तु परमेश्वरि!।
मातृकामन्त्रसहितं मुखवाद्यं सुदुर्लभम्॥
अकारादिक्षकारान्तमनुलोमविलोमतः।
उच्चार्य्य परमेशानि! मुखवाद्यं शुचिस्मिते!॥
सविन्दुं वर्णमुच्चार्य्य पश्चान्मातृकां प्रिये!।
अनुलोमविलोमेन सर्व्वेषु च वरानने!॥
अनेनैव विधानेन मुखवाद्यं करोति यः।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः।
मृत्युञ्जयोऽहं देवेशि! मुखवाद्यप्रसादतः॥
यस्मिन् काले महेशानि! असुरो बलवान् भवेत्।
तस्मिन् काले महेशानि! मुखवाद्यं करोम्यहम्॥
तत् श्रुत्वा परमेशानि! असुरा राक्षसाश्च ये।
पलायन्ते महेशानि! तत्श्रुत्वा परमेश्वरि!॥
ये नरा भुवि तिष्ठन्ति मुखवाद्यं विना प्रिये!।
स सर्व्वयातनाभोगी अन्ते कुम्भीरतां व्रजेत्॥”
इति च लिङ्गार्च्चनतन्त्रे ८ पटलः॥

मुखवासः, पुं, (मुखस्य वासः सौरभ्यमस्मात्।) गन्धतृणम्। इति राजनिर्घण्टः॥

मुखवासनः, पुं, (मुखं वासयतीति। वस्+णिच्+ल्युः।) मुखसद्गन्धकारकद्रव्यम्। तत्पर्य्यायः। आमोदी २। इत्यमरः।२।५।११॥ द्वे मुखवासनवटिकायाः आमोदयुक्तः कर्पूरादिरामोदी इन्। मुखं वासयति मुखवासनः नन्द्यादित्वाद्युः। नानाद्रव्यरचित एकैकश एव वा कर्पूरादिर्मुखोपयोग्यमुखवासनवटिरामोदीति सर्व्वस्वम्। शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्य केशादेः स आमोदीत्याहुरिति सुभूतिः। क्षीरस्वामिना तु समाकर्षादिचतुष्टयेन इष्टगन्धादिचतुष्टयेन च पर्य्यायद्वयमाख्यातम्। शब्दार्णवे तु।
“कस्तूरिकायामामोदः कर्पूरे मुखवासनः।
बकुले स्यात् परिमलश्चम्पके सुरभिस्तथा।
गन्धा द्विपद्विरेफेते गुणिद्रव्ये त्रिलिङ्गका॥”
इति भरतः॥

मुखविलुण्ठिका, स्त्री, (मुखेन विलुण्ठयतीति। लुण्ठ+णिच् ण्वुल्। स्त्रियां टाप्। अत इत्वं च।) छागी। इति शब्दरत्नावली॥

मुखविष्ठा, स्त्री, (मुखे विष्ठा मलमस्याः।) तैलपायिका। यथा,—
“वल्गुलिका मुखविष्ठा परोष्णी तैलपायिका।”
इति हेमचन्द्रः॥

मुखशफः, पुं, (मुखं शफं क्षुर इव तीक्ष्णमस्य।) दुर्म्मुखः। इति शब्दमाला॥

मुखशुद्धिः, स्त्री, (मुखस्य शुद्धिः।) वक्त्रशोधनम्। यथा, आह्निकतत्त्वे।
“अभावे दन्तकाष्ठानां प्रतिषिद्धदिने तथा।
अपां द्वादशगण्डूषैर्म्मुखशुद्धिर्व्विधीयते॥”

मुखशोधनं, क्ली, (मुखस्य शोधनम्।) त्वचम्। इति राजनिर्घण्टः॥

मुखशोधनः पुं, (मुखं शोधयत्यनेनेति। शुध्+णिच्+करणे ल्युट्।) कटुरसः। इति हेमचन्द्रः॥

मुखशोधी, [न्] पुं, (मुखं शोधयतीति। शुध्+णिच्+णिनिः।) जम्बीरः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्याः॥)

मुखषीलः, त्रि, (मुखं षीवति निरस्यति विस्तृतं करोतीति भावः। षीव+इगुपधत्वात् कः पृषोदरादित्वात् वस्य लत्वम्।) दुर्मुखः। इति शब्दमाला॥

मुखसम्भवः, पुं, (मुखात् सम्भव उत्पत्तिरस्य।) ब्राह्मणः। इति हेमचन्द्रः।३।४७६॥

मुखसुरं, क्ली, (मुखस्य सुरा इति “विभाषा सेनासुराच्छायाशालानिशानाम्।२।४।२५। इति षष्ठीसमासे सुराशब्दस्य क्लीबत्वम्।) तालसुरा। इति त्रिकाण्डशेषः। ताड़ी इति भाषा॥

मुखस्रावः, पुं, (स्रु भावे+घञ्। मुखात् स्रावः पतनमस्य।) लाला। इति राजनिर्घण्टः॥

मुखाग्निः, पुं, (मुखं मुखेऽग्निः।) दावाग्निः। यथा,—
“हेमकेलिर्दयोचाय म्रदाकुः स्याद्दवानलः।
मुखोल्का भूतसञ्चारी मुखाग्निर्भरवस्सरः॥”
इति शब्दमाला॥
शवमुखे दत्तवह्निः। इति लोके। शास्त्रे तु शिरःस्थाने। यथा,—
“देवाश्चाग्निमुखाः सर्व्वे गृहीत्वा तु हुताशनम्।
गृहीत्वा पाणिना चैव मन्त्रमेतदुदीरयेत्॥
कृत्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्।
ज्वलमानं तथा वह्निं शिरःस्थाने प्रदापयेत्॥
चातुर्व्वर्णेषु संस्थानमेवं भवति पुत्रिके!॥”
इति शुद्धितत्त्वम्॥

मुखामयः, पुं, (मुखस्यामयः।) मुखरोगः। इति राजनिर्घण्टः॥

मुखार्ज्जकः, पुं, अर्ज्जकः। इति राजनिर्घण्टः॥

मुखास्त्रः पुं, (मुखं अस्त्रमिवास्य।) कर्कटः। इति त्रिकाण्डशेषः॥

मुखोल्का, स्त्री, (मुखं उल्केव यस्याः।) दावानलः। इति शब्दमाला॥

मुख्यः, पुं, प्रथमः कल्पः। इत्यमरः।२।७।४०॥ यागादिषु शास्त्रोक्तः प्रथमः कल्पो मुख्यः स्यात्। यथा, व्रीहिभिर्यजेतेत्यादिना उत्कृष्टत्वात् मुखमिव मुख्यः विकारसंघेत्यादिना इवार्थे यः। इति तट्टीकायां भरतः॥

मुख्यः, त्रि, श्रेष्ठः। इत्यमरः।३।१।५७॥ (तथास्य पर्य्यायः।
“प्रधानमुत्तमं रम्यं श्रेष्ठं मुख्यमनुत्तमम्।
वरं वरेण्यं प्रमुखं परार्द्ध्यं प्रवरन्तथा॥”
इति वैद्यकरत्नमालायाम्॥
यथा, भागवते।४।२५।४६।
“मुख्यानामपुरस्ताद्द्वास्तयापणबहूदनौ॥”)

मुख्यसर्गः, पुं, (मुख्यानां सर्ग इति।) स्थावरसृष्टिः। यथा,—
“मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः।”
इति वराहपुराणम्॥

मुगूहः, पुं, दात्यूहपक्षी। इति भूरिप्रयोगः॥